National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(60): 207-209
© 2025 NJHSR
www.sanskritarticle.com

**Giriraja Upadhyaya**
Research Scholar,
Department of Dvaita Vedanta,
National Sanskrit University,
Tirupathi (A.P)

**Correspondence:**
**Giriraja Upadhyaya**
Research Scholar,
Department of Dvaita Vedanta,
National Sanskrit University,
Tirupathi (A.P)

# पाञ्चरात्रपरिचयः

**Giriraja Upadhyaya**

**लेखनसारः**

'पञ्चरात्रमथाखिलम्' इति प्रमाणभूतानाम् आगमानाम् कथनसमये पञ्चरात्रमपि स्वीक्रियते।भगवता नारायणेन उपदिष्टमखिलं पञ्चरात्रं परमप्रमाणम्। अत्रक्तामार्गाः ममुक्षुणा अनुष्ठेयाः। भगवति कथं भक्तिर्जायते , तेन मुक्तिः कथं सिद्ध्यति इत्यत्र दृश्यते। वेदार्थनिर्णये अस्य प्रमुखं स्थानं विद्यते। अतः अस्य परिचयः, प्रामाण्यं, निर्वचनं, प्रतिपाद्यविषयश्च अस्माभिः सम्यगवगन्तव्यः।अतः अत्र मया अस्य स्वरूपम्, महिमा, अनेकरीत्या निर्वचनं, तन्निर्वचनकथनद्वारा तत्र प्रतिपाद्याः विषयाः , केन केभ्यः उपदिष्टमित्यपि निरूप्यते।

**पीठिका**

**शृतिमूलमिदं तन्त्रं प्रमाणं कल्पसूत्रवत्**[1]

इति पाद्मसम्हिता एव अखिलस्य पाञ्चरात्रागमस्य शृतिमूलत्वं प्रामाण्यं च प्रतिपादयति। वेदवेदाङ्गवत् अस्यापि अध्ययनस्य आवश्यकतां[2] चतुर्वर्गफलदातृत्वं[3] च निरूपयति। हरिसर्वोत्तमत्वं, भगवत्स्वतन्त्रता, इतरेषामस्वतन्त्रता, जगत्सत्यत्वं, तारतम्यभावः, सृष्ट्यादिविषयः, प्रमाणस्वरूपं, मोक्षसाधनं चेति अनेकाः द्वैतमतप्रमेयप्रमुखाः अत्र सन्दृश्यन्ते।अपि च जगत्स्वामिनः गुणपूर्णस्य सकलाभीष्टदस्य देवदेवस्य भगवतः तद्दासभूतानां च देवतानां देवालयनिर्माणविधानं, बिम्बनिर्माणविधानम्, प्रतिष्ठाविधानं, पूजाविधानं, उत्सवविधानं, प्रायश्चित्तविधानं च सम्यग् निरूपितम्।

पञ्चरात्रस्य शृतिमूलत्वम्

महतो वेदवृक्षस्य मूलभूतो महानयम्[4]। इत्युक्तरीत्या पञ्चरात्रं वेदवृक्षस्य मूलभूतम्। अपि च

**वेदमेकायनं नाम वेदानां शिरसि स्थितम्।**
**तदर्थकं पञ्चरात्रं मोक्षदं तत्क्रियावताम्**[5]**॥**

इति तस्य वेदार्थकत्वं , मोक्षदत्वं च निरूप्यते।

पञ्चरात्रशास्त्रं विविधप्रकारेण व्याख्यायते। अस्य निर्वचनं पञ्चरात्रान्तर्गतासु बहुषु संहितासु बहुप्रकारेण दृश्यते।

विहगेन्द्रसंहिता एवं निर्वक्ति[6]

**आदौ कृतयुगे प्राप्ते केशवेन प्रसादिता ।**
**अनन्तो गरुडश्चैव विष्वक्सेनः कपालभृत् ।।**
**ब्रह्मा इत्येव पञ्चैते शृण्वन्ति पृथगीरितम् ।**
**अनन्तं प्रथमे रात्रौ गरुडश्च द्वितीयके ।**
**तृतीयरात्रे सेनेशः चतुर्थे वेधसाश्रितम् ।**
**रुद्रः पञ्चमरात्रे च श्रद्धाशास्त्रं पृथक् पृथक्** ।। इति ।

अनन्तप्रभृतिभिः पञ्चभिः जनैः क्रमात् पञ्चसु रात्रिषु केशवेन भगवता श्रुतत्वात् पञ्चरात्रम् इत्यर्थः।कृतयुगस्यादौ भगवता केशवेन अनन्तः, गरुडः, विष्वक्सेनः, रुद्रः , ब्रह्मा चेति पञ्च जनाः पृथक्

पृथक् शृण्वन्ति।तत्र अनन्तः प्रथमे , गरुडः द्वितीये , विष्वक्सेनः तृतीये , ब्रह्मा चतुर्थे, रुद्रः पञ्चमे च रात्रे एतं श्रद्धाशास्त्रं शृतवन्तः। पुरुषोत्तमसंहितायां –

**भगवद्भक्तिरेव स्यात् भक्तानां मुक्तिकारणम् ।**

**तद्भक्तिबोधकं शास्त्रं पाञ्चरात्रागमं स्मृतम्** [7]।।

मुक्तानां मुक्तिकारणं भगवद्भक्तिरेव। तद्भक्तिं पञ्चरात्रागमः बोधयति इति पञ्चरात्रं भगवद्भकिबोधकं शास्त्रमित्युच्यते।

**प्रथमं ब्रह्मरात्रं तु द्वितीयं शिवरात्रकम् ।**

**तृतीयमिन्द्ररात्रं तु चतुर्थं नागरात्रकम् ।।**

**पञ्चमम् ऋषिरात्रं तु पञ्चरात्रमिति स्मृतम्**[8] । इति

ब्रह्मरात्र-शिवरात्र-इन्द्ररात्र-नागरात्र - ऋषिरात्रभेधेन पञ्चविधरात्रोपेतं शास्त्रं पञ्चरात्रम्।

**रात्रिरज्ञानमित्युक्तं पञ्चेत्यज्ञाननाशकम्।**

**तच्छास्त्रं पाञ्चरात्रं स्यादन्वर्थस्यानुरोधतः॥**[9]

**रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्।**

**तेनेदं पञ्चरात्रं च प्रवदन्ति मनीषिणः॥**[10] इति

रात्रिर्नाम अज्ञानमित्यर्थः। पञ्चशब्दः अज्ञाननाशकपरः। अतः अज्ञाननाशक्त्वात् अस्य पञ्चरात्रमिति न योग्यं भवति। अपि च रात्रमित्यस्य ज्ञानमित्यर्थः ।अज्ञाननाशकं पञ्चविधज्ञानप्रदं शास्त्रं पञ्चरात्रम्इत्यर्थः।

**अथ वक्ष्यामि विप्रेन्द्र पञ्चरात्रार्थमुत्तमम्।**
**पृथिव्यादीनि भूतानि गुणाः पञ्च महामते ।।**
**रात्रयो जन्तवः प्रोक्ताः सर्वशास्त्रेषु निश्चिताः ।**
**तद्योगाद्विनिवृत्तिस्तु पञ्चरात्रमिति स्मृतम्**[11] ।।
**महाभूतगुणाः पञ्च रात्रयो देहिनः स्मृताः ।**
**तद्योगाद्विनिवृत्तेर्वा पञ्चरात्रमिति स्मृतम् ।।**
**भूतमात्राणि गर्वश्च बुद्धिरव्यक्तमेव च ।।**
**रात्रयः पुरुषस्योक्ताः पञ्चरात्रं ततः स्मृतम्** [12]।
**रात्रयो गोचराः पञ्चशब्दादिविषयात्मकाः ।**
**महाभूतात्मका वात्र पञ्चरात्रमिदं ततः॥**
**अवाप्य तु परं तेजो यत्रैताः पञ्चरात्रयः ।**
**नश्यन्ति पञ्चरात्रं तत् सर्वाज्ञानविनाशकम्** [13]।।
**वियद्वायुश्च वह्निश्च आपश्चैव धरा तथा ।**
**रात्रयो देहिनां प्रोक्ता अविद्यासम्भवस्ततः ।।**
**तद्योगाद्विनिवृत्तिं तु कारयेयुर्यतस्ततः।**
**पञ्चरात्रमिति प्रोक्तमेतच्छास्त्रमथा तथा ।।**
**अव्यक्तं च मनो बुद्धिरहङ्कारश्च चित्तकम् ।**
**तन्मात्राश्चैव गन्धाद्या रात्रयो देहिनः स्मृताः ।।**
**एभिः समन्वितैर्देहैर्देहिनां भुक्तिमुक्तिदम् ।**
**साधनं पूजनं त्वेतत् पञ्चरात्रमिति स्मृतम् ।।**
**यतो भूतगुणाः पञ्च रात्रयो देहिनः स्मृताः ।**
**तद्योगात् विनिवृत्तिं तु कारयेयुर्यतस्ततः**[14] ।।

इति शब्दादिपञ्चकस्य पृथिव्यादिपञ्चकस्य वा निवर्तकं देहिनां अज्ञानविनाशकं परतेजःसान्निध्यप्रापकं च शास्त्रं पञ्चरात्रम् ।

**पञ्चानामीप्सितो योऽर्थः स यत्र स्वयमाप्यते ।**
**परमानन्दमेतेन प्राप्नोति परमात्मनः ।।**
**प्रमाणपञ्चकैः पूर्णं पञ्चकार्थोपदेशनम्।**
**प्रपञ्चातीतसद्धर्मं पाञ्चरात्रमुदाहृतम्**[15] ।।

इति पञ्चानामीप्सितार्थदायकं परमात्मप्रापकं शास्त्रं पञ्चरात्रम्।

**पुराणं वेदवेदान्तं तथान्यत् साङ्ख्ययोगजम् ।**
**पञ्चप्रकारं विज्ञेयं यत्र रात्रायतेऽब्जज ।।**
**फलोत्कर्षवशेनैव पञ्चरात्रमिति स्मृतम्**[16] ।

**"पञ्चेतराणि शास्त्राणि रात्रीयन्ते महन्त्यपि ।**
**तत्सन्निधौ समाख्यासौ तेन लोके प्रवर्तते ।।**
**चन्द्रतारागणं यद्वत् शोभते नैव वासरे ।**
**तथेतराणि शोभन्ते पञ्च नैवास्य सन्निधौ । ।**
**पञ्चत्वमथवा यद्वत् दीप्यमाने दिवाकरे ।।**
**ऋच्छन्ति रात्रयस्तद्वदितराणि तदन्तिके**[17]।।

**"साङ्ख्ययोगादिशास्त्राणि रात्रीयन्ते महन्त्यपि ।**
**तत्सन्निधौ समाख्यासौ तेन लोके प्रवर्तते ।।**
**चन्द्रतारागणं यद्वत् शोभते नैव वासरे ।**
**तथेतराणि शोभन्ते पञ्च नैवास्य सन्निधौ । ।**
**पञ्चत्वमथवा यद्वत् दीप्यमाने दिवाकरे ।**
**ऋच्छन्ति रात्रयस्तद्वदितराणि तदन्तिके ।।**
**तस्मात्तु पञ्चरात्राख्यं ब्रह्मा लोकपितामहः ।**
**प्रणवं पञ्चसम्भूतं पञ्चरात्रमिति स्मृतम् ।**
**पञ्चत्वात् जायते जन्तोः पञ्चरात्रमिति स्मृतम्**[18]।।
**साङ्ख्ययोगादयः पञ्चरात्रायन्तेऽयस्य सन्निधौ ।**
**तस्माद्वा पञ्चरात्रार्थः प्रोच्यते सूरिसत्तमैः ।।**
**अथवा रात्रयो यद्वत् सन्निधौ पञ्चताय वै ।**
**नीयन्ते तद्वदन्यानि शास्त्राण्येतस्य सन्निधौ ॥**
**इति वा पञ्चरात्रार्थो विद्वद्भिः कथ्यते द्विज**[19] ॥

भूतानि, मात्राणि, गर्वः, अहङ्कारः, अव्यक्तं चेति पञ्च रात्रयः पुरुषस्य प्रोक्ताः अतः पञ्चरात्रम्।अज्ञाननाशकमेतत्। पञ्चाज्ञाननाशकत्वात्, पञ्चभूतात्मकदेहवतां भ्क्तिमुक्तिदात्, पञ्चभूतगुणानां भोगात् विनिवित्तिं कारयति इति फलोत्कर्षदायकत्वेन पञ्चरात्रमिति निरूपितम् । साङ्ख्य-योग-वेद-पुराण-वेदान्तानां पञ्चानां शास्त्राणां रात्रितापादकं शास्त्रं पञ्चरात्रमिति

**पञ्चेन्दियाणि विषयाः पञ्चभूतानि तद्गुणाः।**
**पञ्चशब्दाभिधेयानि विद्वांसोऽप्याचचक्षिरे ।।**
**रा इत्ययमपि प्रोक्तो धातुरादानवाचकः।**
**विषयेन्द्रियभूतानामादातारश्च पञ्चराः।।**

**मनुष्याः पालनात् तेषां पञ्चरात्रमिति स्मृतम् ।।** [20]

इति विषयेन्द्रियभूतानामादातॄणां पञ्चराणां (मनुष्याणां) त्रातृशास्त्रं पञ्चरात्रम्।

भगवान् भृगुमुद्दिश्य स्वयं वदति --

**पञ्चरात्रोक्तमार्गेण भुक्तिर्मुक्तिश्च जायते ।**
**पञ्चरात्रादृते विप्र मुक्तिमार्गो न विद्यते ।।**
**पञ्चरात्रं मया प्रोक्तं लोकानां हितकाम्यया ।।**
**प्रणवं पञ्चसम्भूतं पञ्चरात्रमिति स्मृतम् ।**
**पञ्चत्वाज्जायते जन्तोः पञ्चरात्रमिति स्मृतम्।।**
**पञ्चरात्रप्रकारेण येऽर्चयिष्यन्ति मानवाः ।**
**नारायणं जगन्नाथं ते यान्ति परमां गतिम्।।**
**पञ्चरात्रमिदं शास्त्रं भुक्तिमुक्तिप्रदायकम् ।**
**मच्छासनमिदं शास्त्रमिदं गृह्णीष्व सादरम् ।।** इति ।

अत्रोक्तमार्गानुवर्तकस्य मुक्तिर्भवति। लोकानां हितकाम्यया मया प्रोक्तमस्ति । अत्रोक्तप्रकारेण ये मामर्चयिष्यन्ति ते मामेव प्राप्नुवन्ति। एतन्मम शासनम् अतः सादरं स्वीकुरु। अपि च सदाचारज्ञानम्, आत्मज्ञानं, परमात्मज्ञानं, जगतः ज्ञानम्, अर्चाज्ञानम् इति पञ्चप्रकारकज्ञानमत्र दृशते इति कण्वसंहितायाम् चतुर्थे अध्याये स्वयं भगवान् ऋषीनुद्दिश्य वदति

**रात्रं तु ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्।**
**सदाचारात्मकं ज्ञानं स्वात्मनश्च परात्मनः।।**
**जगतश्च विवेकेन ज्ञानमर्चात्मकं तथा।**
**पञ्चप्रकारता यत्र समेत्य दृश्यते बुधैः।।**

**उपसंहारः**

इत्येवं रूपेण एकायनशास्त्रमिति, पाञ्चरात्रमिति, भगवच्छास्त्रमिति पञ्चरात्रं बहुविधं बहुधा भाषितं पुरा इति आर्योक्त्या पाञ्चरात्रागमसंहिताः अष्टोत्तरशताधिकतया विराजन्ते। बह्व्यः पाञ्चरात्रसंहिताः महता प्रयासेन तत्र तत्र लभ्यमानतालपत्राणि, मातृकाः सम्पाद्य निर्दोषतया पण्डिताः सम्पादयन्ति। अक्षयपात्रवत् संहिताग्रन्थाः उत्पद्यमानाः सन्ति। काश्चन संहिताः प्रकाशिताः, काश्चन प्रकाशनीयाश्च सन्ति ।

**ग्रन्थसूची**

पारमेश्वरसंहिता - गोविन्दाचार्याः -कल्याणमुद्रालयः
नारदपञ्चरात्रम् के एम् ब्यानर्जी बिशप्स् कालेज् प्रेस्स्
कपिञ्जलसंहिता सीतारामानुजाचार्युलु लिबर्टि प्रैड् आफ़् इण्डिया
परमसंहिता बेनेय्तोश् भट्टाचार्य गोवेर्न्मेन्त् प्रेस्स् बरोडा
शाण्डिल्यसंहिता गोपिनाथ कविराज् युरेका प्रिन्टिन्ग् वर्क्स्
पौष्करसंहिता रामानुजाचार्युलु ग्रानपण्डितर् प्रेस्स्
पाद्मसंहिता सम्पत् पाञ्चरात्रपरिशोधनपरिषत्
अनिरुद्धसंहिता श्रीनिवास अय्यन्गार् अय्यन्गार् प्रेस्स्

**संदर्भः-**

1. विष्वक्सेनसंहिता अ.८.श्लो.६
2. अध्येतव्यं च वेदवत्- पा.सं १-७१
3. पञ्चरात्राख्यशास्त्रं तु चतुर्वर्गफलप्रदम् -पा.सं १-९३
4. पारमेश्वरसंहिता अ.१.श्लो.७२
5. श्रीप्रश्नसंहिता अ.२.३८
6. प्रथमः पटलः
7. अ.१.श्लो.४
8. भागवतम् २.१२.३
9. श्रीप्रश्नसंहिता २.४०
10. नारदपञ्चरात्रम् १.४४
11. कपिञ्जलसंहिता १.३१.३
12. परमसंहिता १.३९-४१
13. विष्वक्सेनसंहिता २.४९-५१
14. विष्णुतन्त्रम्१.७८-८२
15. शाण्डिल्यसंहिता ४.७६-७७
16. पौष्करसंहिता ३८.३०७
17. पाद्मसंहिता.१.७२-७५
18. अनिरुद्धसंहिता१.३५-४०
19. परमसंहिता.२.६-८
20. विहगेन्द्रसंहिता २.३-५